(यथा च साहित्यदर्पणे । ३ । ६५—६३ ।
"अथ नायिका त्रिविधा स्वाऽन्या साधारणस्त्रीति ।
नायकसामान्यगुणैर्भवति यथासम्भवैर्युक्ता ॥
विनयार्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया ।
सापि कथिता त्रिविधा मुग्धा मध्या प्रगल्भेति ॥
प्रथमावतीर्णयौवनमदनविकारा रतौ वामा ।
कथिता मृदुश्च माने समधिकलज्जावती मुग्धा ॥
मध्या विचित्रसुरता प्ररूढ़स्मरयौवना ।
ईषत्प्रगल्भवचना मध्यमव्रीड़िता मता ॥
स्मरान्धा गाढ़तारुण्या समस्तरतकोविदा ।
भावोन्नता दरव्रीड़ा प्रगल्भाक्रान्तनायका ॥
ते धीरा चाप्यधीरा च धीराधीरेति षड्विधे ।
प्रियं सोत्प्रासवक्रोक्त्या मध्याधीरा दहेद्रुषा ॥
धीराधीरा तु रुदितैरधीरा परुषोक्तिभिः ।
प्रगल्भा यदि धीरा स्याच्छन्नकोपाकृतिस्तदा ॥
उदास्ते सुरते तत्र दर्शयन्त्यादरान् बहिः ।
धीराधीरा तु सोल्लुण्ठभाषितैः खेदयेदमुम् ॥
तर्जयेत्ताड़येदन्या प्रत्येकं ता अपि द्विधा ।
कनिष्ठज्येष्ठरूपत्वान्नायकप्रणयं प्रति ॥
मध्याप्रगल्भयोर्भेदास्तस्माद् द्वादश कीर्त्तिताः ।
मुग्धा त्वेकैव तेन स्युः स्वीयाभेदास्त्रयोदश ॥
परकीया द्विधा प्रोक्ता परोढ़ा कन्यका तथा ।
यात्रादिनिरताऽन्योढ़ा कुलटा गलितत्रपा ॥
कन्या त्वजातोपयमा सलज्जा नवयौवना ।
धीरा कलाप्रगल्भा स्याद्वेश्या सामान्यनायिका ॥
निर्गुणानपि न द्वेष्टि न रज्यति गुणिष्वपि ।
वित्तमात्रं समालोक्य सा रागं दर्शयेद् बहिः ॥
काममङ्गीकृतमपि परिक्षीणधनं नरम् ।
मात्रा निष्कासयेदेषा पुनः सन्धानकाङ्क्षया ॥
तस्कराः पण्डका मूर्खाः सुखप्राप्तधनास्तथा ।
लिङ्गिनश्छन्नकामाद्या आसां प्रायेण वल्लभाः ॥
एषापि मदनायत्ता क्वापि सत्यानुरागिणी ।
रक्तायां वा विरक्तायां रतमस्यां सुदुर्लभम् ॥
अवस्थाभिर्भवन्त्यष्टावेताः षोड़शभेदिताः ।
स्वाधीनभर्तृका तद्वत् खण्डिताऽथाभिसारिका ॥
कलहान्तरिता विप्रलब्धा प्रोषितभर्तृका ।
अन्या वासकसज्जा स्याद्विरहोत्कण्ठिता तथा ॥
कान्तो रतिगुणाकृष्टो न जहाति यदन्तिकम् ।
विचित्रविभ्रमासक्ता सा स्यात् स्वाधीनभर्तृका ॥
पार्श्वमेति प्रियो यस्या अन्यसम्भोगचिह्नितः ।
सा खण्डितेति कथिता धीरैरीर्ष्याकषायिता ॥
अभिसारयते कान्तं या मन्मथवशंवदा ।
स्वयं वाऽभिसरत्येषा धीरैरुक्ताऽभिसारिका ॥
संलीना स्वेषु गात्रेषु मूकीकृतविभूषणा ।
अवगुण्ठनसंवीता कुलजाऽभिसरेत् यदि ॥
विचित्रोज्ज्वलवेशा तु रणन्नूपुरनिस्वना ।
प्रमोदस्मेरवदना स्याद् वेश्याऽभिसरेत् यदि ॥
मदस्खलितसंलापा विभ्रमतफुल्ललोचना ।
आविद्धगतिसञ्चारा स्यात् प्रेष्याभिसरेद् यदि ॥*
प्रसङ्गादभिसारस्थानानि कथ्यन्ते ।
क्षेत्रं वाटी भग्नदेवालयो दूतीगृहं वनम् ।
मालञ्च श्मशानञ्च नद्यादीनां तटी तथा ॥
एवं कृताभिसाराणां पुंश्चलीनां विनोदने ।
स्थानान्यष्टौ तथा ध्वान्तच्छन्नेषु क्वचिदाश्रयः ॥*॥
चाटुकारमपि प्राणनाथं रोषादपास्य या ।
पश्चात्तापमवाप्नोति कलहान्तरिता तु सा ॥
प्रियः कृत्वापि सङ्केतं यस्या नायाति सन्निधिम् ।
विप्रलब्धा तु सा ज्ञेया नितान्तमवमानिता ॥
नानाकार्य्यवशाद् यस्या दूरदेशं गतः पतिः ।
सा मनोभवदुःखार्त्ता भवेत् प्रोषितभर्तृका ॥
कुरुते मण्डनं यस्याः सज्जिते वासवेश्मनि ।
सा तु वासकसज्जा स्याद्विदितप्रियसङ्गमा ॥
आगन्तुं कृतचित्तोऽपि दैवान्नायाति यत्प्रियः ।
तदनागमदुःखार्त्ता विरहोत्कण्ठिता तु सा ॥
इति साष्टाविंशतिशतमुत्तममध्यमाधमस्वरूपतः ।
चतुरधिकाशीतियुतं शतत्रयं नायिकाभेदानां
स्यात् ॥
क्वचिदन्योन्यसाङ्कर्य्यमासां लक्ष्येषु दृश्यते ।
इतरा अप्यसंख्यास्ता नोक्ता विस्तरशङ्कया ॥"
एतासामुदाहरणानि तत्रैव विस्तरशो द्रष्टव्यानि ॥
अथासामलङ्काराः । यथा, तत्रैव । ३ । ६४ ।
"यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः ।
अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः ॥
शोभा कान्तिश्च दीप्तिश्च माधुर्य्यञ्च प्रगल्भता ।
औदार्य्यं धैर्य्यमित्येते सप्तैव स्युरयत्नजाः ॥
लीलाविलासौ विच्छित्तिर्विव्वोकः किलकिञ्चितम् ।
मोट्टायितं कुट्टमितं विभ्रमो ललितं मदः ॥
विहृतं तपनं मौग्ध्यं विक्षेपश्च कुतूहलम् ।
हसितं चकितं केलिरित्यष्टादशसंख्यकाः ।
स्वभावजाश्च भावाद्या दश पुंसां भवन्त्यपि ॥"
अथ मुग्धाकन्ययोरनुरागेङ्गितानि । यथा, तत्रैव । ३ । १२३ ।
"दृष्ट्वा दर्शयति व्रीड़ां सम्मुखं नैव पश्यति ।
प्रच्छन्नं वा भ्रमन्तं वा तिर्य्यक् तं पश्यति प्रियम् ॥
बहुधा पृच्छ्यमानापि मन्दमन्दमधोमुखी ।
सगद्गदस्वरं किञ्चित् प्रियं प्रायेण भाषते ॥
अन्यैः प्रवर्त्तितां शश्वत् सावधाना च तत्कथाम् ।
शृणोत्यन्यत्र दत्ताक्षी प्रिये बालानुरागिणी ॥"
अथ सकलानामपि नायिकानामनुरागेङ्गितानि । यथा, तत्रैव । ३ । १२४—१२५ ।
"चिराय सविधे स्थानं प्रियस्य बहु मन्यते ।
विलोचनपथञ्चास्य न गच्छत्यनलङ्कृता ॥
क्वापि कुन्तलसंव्यानसंयमव्यपदेशतः ।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम् ॥
आच्छादयति वागाद्यैः प्रियस्य परिचारकान् ।
विश्वसित्यस्य मित्रेषु बहुमानं करोति च ॥
सखीमध्ये गुणान् ब्रूते स्वधनं प्रददाति च ।
सुप्ते स्वपिति दुःखस्य दुःखं धत्ते सुखे सुखम् ॥
स्थिता दृष्टिपथे शश्वत् प्रिये पश्यति दूरतः ।
आभाषते परिजनं सम्मुखे स्मरविक्रियम् ॥
यत् किञ्चिदपि संवीक्ष्य कुरुते हसितं मुधा ।
कर्णकण्डूयनं तद्वत् कवरीमोक्षसंयमौ ॥
जृम्भते स्फोटयत्यङ्गं बालमाश्लिष्य चुम्बति ।
भाले तथा वयस्याया आरभेत् तिलकक्रियाम् ॥
अङ्गुष्ठाग्रेण लिखति सकटाक्षं निरीक्षते ।
दशति स्वाधरं चापि ब्रूते प्रियमधोमुखी ॥
न मुञ्चति च तं देशं नायको यत्र दृश्यते ।
आगच्छति गृहं चास्य कार्य्यव्याजेन केनचित् ॥
दत्तं किमपि कान्तेन धृत्वाङ्गे मुहुरीक्षते ।
नित्यं हृष्यति तद्योगे वियोगे मलिना कृशा ॥
मन्यते बहु तच्छीलं तत्प्रियं मन्यते प्रियम् ।
प्रार्थयतेऽल्पमूल्यानि सुप्ता न परिवर्त्तते ॥
विकारान् सात्त्विकानस्य सम्मुखी नाधिगच्छति ।
भाषते सूनृतं स्निग्धमनुरक्ता नितम्बिनी ॥
एतेष्वधिकलज्जानि चेष्टितानि नवस्त्रियाः ।
मध्यव्रीड़ानि मध्यायाः स्रंसमानत्रपाणि तु ॥
अन्यस्त्रियाः प्रगल्भायास्तथा स्युर्वारयोषितः ॥
लेखप्रस्थापनैः स्निग्धैर्वीक्षितैर्मृदुभाषितैः ।
दूतीसम्प्रेषणैर्नार्य्या भावाभिव्यक्तिरिष्यते ॥"*॥)
कस्तूरीविशेषः । यथा, राजनिर्घण्टे ।
"चूर्णाकृतिस्तु खरिका तिलका तिलाभा
कौलत्थबीजसदृशी च कुलत्थिकाख्या ।
स्थूला यतः कियदियं किल पिण्डिका स्या-
त्स्याच्च किञ्चिदधिकापि च नायिकेषा ॥".

नारं,· क्ली, (नराणां समूहः । नर + समूहे अण् ।) नरसमूहः । इति व्याकरणम् ॥ (नरस्येदमिति । नर + "तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) नरसम्बन्धिनि, त्रि । यथा,—
"मलमूत्रपुरीषास्थिनिर्गतं ह्यशुचि स्मृतम् ।
नारं स्पृष्ट्वा तु सस्नेहं सचेलो जलमाविशेत् ॥"
इति सामान्यनिरुक्तौ जगदीशधृतस्मृतिवचनम् ॥

नारः, पुं, (नरस्यायमिति । नर + अण् ।) तर्णकः । जलम् । इति मेदिनी । रे, ५३ ॥

नारकः, पुं, (नरक एव । प्रज्ञाद्यण् ।) नरकः । (नरके भवः । "तत्र भवः ।" ४।३।५३। इत्यण् ।) नरकस्थप्राणिनि, त्रि । इत्यमरः । १ । ६ । १ ॥
(यथा, मार्कण्डेये । १५ । ७३ ।
"अनुकम्पामिमामद्य नारकेष्विह कुर्व्वतः ।
तदेव शतसाहस्रं संख्यामुपगतं तव ॥")

नारकी, [न्] त्रि, (नरको भोग्यतया अस्यास्तीति । नरक + इनिः ।) नरकस्थः । यथा,—
"परेण विहितं कर्म्म स्वकर्म्मेति वदेच्च यः ।
स उच्यते ब्रह्मघाती महानारकिनारकी ॥"
इति बृहद्धर्म्मपुराणे उत्तरखण्डे १८ अध्यायः ॥

नारकीटः, पुं, अश्मकीटः । (नारेषु नरसमूहेषु कीट इव हेयार्हत्वात् ।) स्वदत्ताशाविहन्ता । इति मेदिनी । टे, ६३ ॥

नारङ्गं, क्ली, (नृणातीति । नॄ नये + बाहुलकात् अङ्गच् धातोर्वृद्धिश्च । इत्युज्ज्वलदत्तः । १।१२१।) गर्जरम् । इति राजनिर्घण्टः ॥

नारङ्गः, पुं, (नॄ नये + अङ्गच् । वृद्धिश्च ।) पिप्पलीरसः । यमजप्राणी । विटः । इति मेदिनी । गे, ३६ ॥ फलवृक्षविशेषः । नारङ्गी इति भाषा ॥ तत्पर्य्यायः । नागरङ्गः २ सुरङ्गः ३ त्वग्गन्धः ४ ऐरावतः ५ वक्त्रवासः ६ योगारङ्गः ७ योगरङ्गः ८ सरङ्गः ९ गन्धाढ्यः १० गन्धपत्रः ११